This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ ॥श्रीगुरुगणपतिर्निष्टदेवताभ्योनमः॥हरिः ॐ३॥अँशिक्षांप्रवक्ष्यामिपाणि थ
नीयंमतंयथा॥शास्त्रानुपूर्वंतद्विद्याद्यथोक्तंलोकवेदयोः॥१॥प्रसिद्धमपिश
ब्दार्थमविज्ञातमबुद्धिभिः॥पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिं॥२॥त्रि
षष्टिश्चतुःषष्टिर्वावर्णाःशंभुमतेमताः॥प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्व
यंभुवा॥३॥स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः॥यादयश्चस्मृताह्यष्टौ
चत्वारश्चयमास्मृताः॥४॥अनुस्वारोविसर्गश्चकःपौचापिपराश्रितौ॥दुस्पृ
ष्टश्चेतिविज्ञेयोलृकारःप्लुतएवच॥५॥१॥आत्माबुध्यासमेत्यार्थान्मनोयुंक्तेवि
वक्षया॥मनःकायाग्निमाहंतिसप्रेरयतिमारुतं॥६॥मारुतस्तूरसिचरन्मंद्रंज
नयतिस्वरं॥प्रातःसवनयोगंतंछंदोगायत्रमाश्रितं॥७॥कंठेमाध्यंदिनयुगंम ॥१॥

ध्यमंत्रैष्टुभानुगं॥तारंतार्तीयसवनंशीर्षण्यंजागतानुगं॥८॥सोदीर्णोमूर्ध्न्य
भिहतोवक्त्रमापद्यमारुतः॥वर्णाञ्जनयतेतेषांविभागःपंचधास्मृतः॥९॥स्वरतः
कालतःस्थानात्प्रयत्नानुप्रदानतः॥इतिवर्णविदःप्राहुर्निपुणंतन्निबोधत॥१०॥
दा २॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः॥ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअ
चि॥११॥उदात्तेनिषादगांधारावनुदात्तऋषभधैवतौ॥स्वरितःप्रभवाह्येतेषड्जम
ध्यमपंचमाः॥१२॥अष्टौस्थानानिवर्णानामुरःकंठःशिरस्तथा॥जिव्हामूलंदन्ता च
श्चनासिकोष्ठौचताल्वुच॥१३॥ओभावश्चविवृत्तिश्चशषसारेफएवच॥जिव्हा
मूलमुपध्माचगतिरष्टविधोष्मणः॥१४॥यद्योभावप्रसंधानमुकारादिपरंपदं॥
स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्मणः॥१५॥हकारंपंचमैर्युक्तमंतस्थाभिश्चसंयु
॥३॥

Checked 2012
Accession No. ~~8439~~ M850.
Title! - वेदांगशिक्षा
Date: - शके 1787 सन 1865
पत्रे (5)
KKSU LIBRARY RAMTEK 441 106 M-850 Dist Nagpur
(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ तं॥ औरस्यंतंविजानीयात्कंठ्यमाहुरसंयुतं॥१६॥कंठ्यावहाविचुयशास्ताल।
व्याओष्टजावुपू॥स्युर्मूर्द्धन्याऋटुरषादंत्यालृतुलसाःस्मृताः॥१७॥जिव्हामूलेतु
कुःप्रोक्तोदंत्योष्ठ्योवःस्मृतोबुधैः॥एऐतुकंठतालव्याओऔकंठोष्ठजौस्मृतौ॥१८
ष्य ॥अर्द्धमात्रातुकंठ्यास्यादेकारैकारयोर्भवेत्॥ओकारौकारयोर्मात्रातयोर्विवृत
त्रि संवृतं॥१९॥संवृतंमात्रिकंज्ञेयंविवृतंतुद्विमात्रिकं॥घोषावासंवृताःसर्वेअघोषावि त्रि
वृताःस्मृताः॥२०॥४॥स्वराणामूष्मणांचैवविवृतंकरणंस्मृतं॥तेभ्योपिविवृता
वेङौताभ्यामैचौतथैवच॥२१॥अनुस्वारयमानांचनासिकास्थानमुच्यते॥अयो
गवाहाविज्ञेयाआश्रयस्थानभागिनः॥२२॥अलाबुवीणानिर्घोषोदंत्यमूल्यस्व
राननु॥अनुस्वारस्तुकर्तव्योनित्यंह्रोःशषसेषुच॥२३॥अनुस्वारेविवृत्त्यांतुवि ॥२॥

रामेचाक्षरद्वये॥द्विरोष्ठ्यौतुविगृह्णीयाद्यत्रौकारवकारयोः॥२४॥व्याघ्रीयथा
हरेत्पुत्रान्दंष्ट्राभ्यांनचपीडयेत्॥भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयोजयेत्॥२५॥
॥५॥यथासौराष्ट्रिकानारीतक्राँऽइत्यभिभाषते॥एवंरंगाःप्रयोक्तव्याःखेअराँऽ
इवखेदया॥२६॥रंगवर्णंप्रयुंजीरन्नोग्रसेत्पूर्वमक्षरं॥दीर्घस्वरंप्रयुंजीयात्पश्चा
न्नासिक्यमाचरेत्॥२७॥हृदयेचैकमात्रस्त्वर्द्धमात्रस्तुमूर्द्धनि॥नासिकायांत
थाईचरंगस्येवंद्विमात्रता॥२८॥हृस्वाद्धुक्करेतिधन्कांस्येनसमनुस्वरनूँ॥मा म
र्विंचद्विमात्रंचजघन्वाँऽइतिनिदर्शनं॥२९॥मध्येतुकंपयेत्कंपमुभौपार्श्वौसि
मोभवेत्॥सरंगंकंपयेत्कंपंरथीवेतिनिदर्शनं॥३०॥एवंवर्णाःप्रयोक्तव्याना।
व्यक्तानचपीज्झिताः॥सम्यग्वर्णप्रयोगेणब्रह्मलोकेमहीयते॥३१॥६॥गीती।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥ शीघ्रीशिरःकंपीनतथालिखितपाठकः॥अनर्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः
॥३२॥माधुर्यमक्षरव्यक्तिःपदच्छेदस्तुसुस्वरः॥धैर्यंलयसमर्थंचषडेतेपाठका
गुणाः॥३३॥शंकितंभीतमुद्घुष्टमव्यक्तमनुनासिकं॥काकस्वरंशिरसिगतंतथा
स्थानविवर्जितं॥३४॥उपांशुदष्टंत्वरितंनिरस्तंविलंबितंगद्गदितंप्रगीतं॥नि
ष्पीडितंग्रस्तपदाक्षरंचवदेन्नदीनंनतुसानुनास्यं॥३५॥प्रातःपठेन्नित्यमुरः
स्थितेनस्वरेणशार्दूलरुतोपमेन॥मध्यंदिनेकंठगतेनचैवचक्राह्वसंकूजि
तसंनिभेन॥३६॥तारंतुविद्यात्सवनंततीयंशिरोगतंतच्चसदाप्रयोज्यं॥मयू
रहंसान्यभृतस्वराणांतुल्येननादेनशिरस्थितेन॥३७॥७॥अचोस्पृष्टायण
स्त्वीषन्नेमिःस्पृष्टाःशलःस्मृताः॥शेषाःस्पृष्टाहलःप्रोक्तानिबोधानुप्रदानतः॥ ॥३॥

रस्तथा

य ॥३८॥अमोनुनासिकानह्रौनादिनोहझषस्मृताः॥ईषन्नादायणोजश्चश्वासि णो
नस्तुखफादयः॥३९॥ईषच्छ्वासांश्चरोविद्याद्गोर्धामैतत्प्रचक्षते॥दाक्षीपुत्रःपा
णिनायेनेदंव्यापितंभुवि॥४०॥छंदःपादौतुवेदस्यहस्तौकल्पोथपठ्यते॥ज्योति
षामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते॥४१॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृ
तं॥तस्मात्सांगमधीत्यैवब्रह्मलोकेमहीयते॥४२॥उदात्तमाख्यातिवृषोंगुली
नांप्रदेशिनीमूलनिविष्टमूर्धा॥उपांतमध्येस्वरितंधृतंचकनिष्ठिकायामनुदा
त्तमेव॥४३॥८॥उदात्तंप्रदेशिनींविद्यात्प्रचयंमध्यतोंगुलिं॥निहतंतुकनिष्ठि
कांस्वरितोपकनिष्ठिकां॥४४॥अंतोदात्तमाद्युदात्तमुदात्तमनुदात्तंनीचस्वरि
तं॥मध्योदात्तंस्वरितंद्व्युदात्तंत्र्युदात्तमितिनवपदशय्या॥४५॥अग्निःसोमःप्र

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥ वोचीयंहविषास्वर्बृहस्पतिरिंद्राबृहस्पती॥अग्निरित्यंतोदात्तंसोमइत्याद्युदा
त्तंप्रेत्युदात्तंवइत्यनुदात्तंवीर्यंनीचस्वरितं॥४६॥हविषांमध्योदात्तंस्वरितिस्वरितं
॥बृहस्पतिरितिद्युदात्तमिंद्राबृहस्पतीइतित्र्युदात्तं॥४७॥अनुदात्तोहृदिज्ञेयो
मूर्ध्न्युदात्तउदाहृतः॥स्वरितःकर्णमूलीयःसर्वास्येप्रचयःस्मृतः॥४८॥९॥चाष
स्तुवदतेमात्रांद्विमात्रंत्वेववायसः॥शिखीरौतित्रिमात्रंतुनकुलस्त्वर्धमात्रकं॥४९
॥कुतीर्थादागतंदग्धमपवर्णंचभक्षितं॥नतस्यपाठेमोक्षोस्तिपापाहेरिवकिल्बि
षात्॥५०॥सुतीर्थादागतंव्यक्तंस्वाम्नाय्यंसुव्यवस्थितं॥सुस्वरेणसुवक्त्रेणप्रयु
क्तंब्रह्मराजते॥५१॥मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह॥स
वाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधात्॥५२॥अनक्षरंहतायु ॥४॥

ष्यंविस्वरंव्याधिपीडितं॥अक्षताशस्त्ररूपेणवज्रंपततिमस्तके॥५३॥हस्त
हीनंतुयोधीतेस्वरवर्णविवर्जितं॥ऋग्यजुःसामभिर्दग्धोवियोनिमधिगच्छ
ति॥५४॥हस्तेनवेदंयोधीतेस्वरवर्णार्थसंयुतं॥ऋग्यजुःसामभिःपूतोब्रह्म
लोकेमहीयते॥५५॥१०॥शंकरःशांकरींप्रादाद्दाक्षीपुत्रायधीमते॥वाङ्मये
भ्यःसमाहृत्यदेवींवाचमितिस्थितिः॥५६॥येनाक्षरसमाम्नायमधिगम्यमहे
श्वरात्॥कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥५७॥येनधौतागिरःपुंसां
विमलैःशब्दवारिभिः॥तमश्चाज्ञानजंभिन्नंतस्मैपाणिनयेनमः॥५८॥अज्ञा
नांधस्यलोकस्यज्ञानांजनशलाकया॥चक्षुरुन्मीलितंयेनतस्मैपाणिनयेनमः
॥५९॥त्रिनयनमभिमुखनिःसृतामिमांयइहपठेत्प्रयतश्चसदाद्विजः॥सभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ वतिधनधान्यपशुपुत्रकीर्त्तिमानतुलंचसुखंसमश्नुतेदिवीतिदिवीति॥९॥११
॥अथशिक्षामाखोदात्तश्चहकारंस्वराणांयथागीत्यचोस्मस्थोदात्तंचापस्कंशंक
राएकादश॥११॥इतिवेदांगशिक्षासमाप्ता॥छ॥श्रीमत्त्रिपुरसुंदर्य्यर्पणमस्तु॥॥
शाके१७८७संवत्१९२२ईश्वरनामाब्देयाम्यायनेप्रावृट्तौभाद्रपदमासेकृष्णपक्षेद्वि
तीयांमंदवासरेश्रीधाराक्षेत्रेश्रीपद्मेशसंनिधौजोशीउपनामकाग्निहोत्रिणास
खारामभट्टात्मजबालकृष्णेनलिखीकृतं॥छ॥श्रीमंगलमाहेश्वर्यैनमः॥छ॥शिवं॥

॥५॥

M-820

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 10:58
,TRANSFERRED=2020/10/22 at 11:00:06
,PAGES=5
,TYPE=STD
,NAME=S0004350
,Book Name=M-850-VEDANG SIKSHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection